दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-218 | 1 | मई 31, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लपूर्णिमा
ज्येष्ठ 17 प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमाचल-निर्वाचनम्- चतुर्णाम् नगरनिगमानां परिणामाः प्रातःकाले, जिलापरिषद्- बीडीसी- परिणामाः रात्रौ भविष्यन्ति

3 सर्वकारीयसेवायां नियुक्तितः पूर्वं मादकद्रव्यपरीक्षणम् ('डोप टेस्ट') भविष्यति अनिवार्यम् - मुख्यमंत्री सुक्खुः

5 आचारः प्रथमो धर्मः इति सूक्तिः। जगति केनचन प्रवर्तनीयं चेत् तत्कृते प्रथमतः स्वाचरणस्य, सुव्यवहारस्य वा अत्यन्तम् आवश्यकता

## भारतं क्षेत्रीयस्थिरतायाः प्रमुखः स्तम्भः - अमेरिकीयरक्षासचिवः पीट हेगसेथ महोदयः




अमेरिकीयरक्षासचिवः पीट हेगसेथ महोदयः भारतं क्षेत्रीयस्थिरतायाः एकं प्रमुखं स्तम्भं कथितवान्। सः सिङ्गापुरनगरे आयोजिते 'शाङ्ग्री-ला संवादे' भारतं हिन्द-प्रशान्तक्षेत्रे सुरक्षायाः सन्तुलनस्य च एकम् महत्त्वपूर्णम् आधारं वर्णितवान्। श्रीहेगसेथ महोदयः भारतस्य सैन्य-आधुनिकीकरणस्य रक्षा-औद्योगिक-क्षमतायाः च मुक्तकण्ठेन प्रशंसां कृतवान्। रक्षासचिवः भारतस्य रक्षा-निर्माण-क्षेत्रस्य अपि सराहनां कृतवान्, उन्नत-सैन्य-अभियानेषु सहयोगं कर्तुं तस्य वर्धमानायाः क्षमतायाः उल्लेखं च कृतवान्।श्रीहेगसेथ महोदयः अवदत् यत् भारतं उच्चस्तरीय-सैन्य-क्षमताः रक्षितुं आवश्यकं औद्योगिकं रसद-अवसंरचनां (लॉजिस्टिक्स-इन्फ्रास्ट्रक्चर) च विकसयति, यस्मिन् साक्षात्कृत-रक्षा-मञ्चानां (शेयर्ड डिफेन्स प्लेटफॉर्म्स) परिष्कार-अनुरक्षण-क्षमता तथा च अस्मिन् क्षेत्रे कार्यरतस्य अमेरिकादेशस्य नौसेना-जहानां सहयोग-क्षमता सम्मिलिता अस्ति। श्रीहेगसेथ महोदयः उक्तवान् यत् भारतं अमेरिकादेशः च सैन्यसज्जतां वर्धयितुं संयुक्त-उत्पादन-पहल-विषये (जॉइंट प्रोडक्शन इनिशिएटिव्स) कार्यं कुरुतः।

## पश्चिम-एशिया-सङ्घर्षस्य अभावेऽपि भारतीय-अर्थव्यवस्थायाः प्रदर्शनं सुदृढम्: वित्तमन्त्रालयः

पश्चिम-एशिया-क्षेत्रे प्रचलितेन सङ्घर्षेण उत्पन्नायाः वैश्विक-अनिश्चिततायाः अभावेऽपि भारतीय-अर्थव्यवस्थायाः प्रदर्शनं सुदृढं वर्तते। वित्तमन्त्रालयस्य मई-२०२६ (द्विसहस्रं षड्विंशत्युत्तर) तमे वर्षे प्रकाशितायाः मासिक-आर्थिक-समीक्षायाः अनुसारं वैदेशिक-मुद्रा-भण्डारः सुगम-स्थितौ अस्ति। मन्त्रालयः उक्तवान् यत् कच्चेन्धनतैलस्य (क्रूड ऑयल) मूल्यवृद्धेः, वित्तीयस्थितेः कठोरतायाः, प्रमुख-अर्थव्यवस्थानां विकासदरस्य मन्दीभवनस्य च वैश्विक-वातावरणस्य प्रभावः भारतीय-अर्थव्यवस्थायाः उपरि अपि अभवत्।अस्मिन् वर्षे मार्च-मासे मुख्य-औद्योगिक-सूचकाङ्कः (कोर इण्डस्ट्रियल इण्डेक्स) सामान्यरूपेण शून्य-दशमलव-चतुः (०.४%) प्रतिशतं यावत् न्यूनः अभवत्, यदा तु आधारभूत-संरचना (इन्फ्रास्ट्रक्चर) विनिर्माण-गतिविधि-क्षेत्रे च स्वकीयम् उत्तमं प्रदर्शनं निरन्तरं अकुरुताम्।

खुद्रा-मुद्रास्फीतिः अस्मिन् वर्षे मार्च-मासे त्रि-दशमलव-चतुः (३.४%) प्रतिशते नियन्त्रिता आसीत्। अर्थव्यवस्थायां तरलता (लिक्विडिटी) अतिरिक्ता आसीत् तथा च बैङ्क-ऋणस्य विकासदरः अपि स्थिरा आसीत्। एषा गतवर्षस्य तुलनया १७ (सप्तदश) प्रतिशतात् अधिका अवर्धत।

## म्यांमारदेशस्य राष्ट्रपतिः ऊ मिन आंग ह्लाइंग् महोदयः पञ्चदिवसीय-भारतयात्राप्रसङ्गे ह्यः सायं नवदेहलीं प्राप्तवान्



म्यांमारदेशस्य राष्ट्रपतिः ऊ मिन आंग ह्लाइंग् महोदयः पञ्चदिवसीय-भारतयात्राप्रसङ्गे ह्यः सायं नवदेहलीं प्राप्तवान्। केन्द्रीय-विदेश-राज्यमन्त्री कीर्तिवर्धनसिंहः विमानपत्तने तस्य स्वागतं कृतवान्। अस्मात् पूर्वं राष्ट्रपतिः बिहारराज्यं गत्वा गयायाः महाबोधिमन्दिरे पूजा-अर्चनां कृतवान्। तेन सह बहवः मन्त्रिणः, वरिष्ठाधिकारिणः, उद्योगजगतः च उच्चस्तरीयं शिष्टमण्डलम् आगतम् अस्ति। वर्तमानपदे तिष्ठतः राष्ट्रपतेः इयं प्रथमा भारतयात्रा अस्तिविदेशमन्त्री डॉ. सुब्रह्मण्यम् जयशंकरः ह्यः सायं श्रीह्लाइंग् महोदयेन सह अमिलत्। डॉ. जयशंकरः दीर्घकालिक-द्विपक्षीय-सहयोगं सुदृढीकर्तुं म्यांमार-राष्ट्रपतेः सकारात्मक-दृष्टिकोणस्य प्रशंसां कृतवान्।म्यांमारदेशस्य राष्ट्रपतिः अद्य प्रधानमन्त्रिणा नरेन्द्रमोदिना सह द्वयोः देशयोः ऐतिहासिक-सांस्कृतिक-सम्बन्धान् सुदृढीकर्तुं चर्चां करिष्यति। सः व्यापारिकमञ्चे अपि भागं ग्रहीष्यति। राष्ट्रपतिः मङ्गलवासरे मुम्बईनगरं गमिष्यति।

## सुभाषितम्

**हर्षस्थानसहस्राणि, भयस्थानशतानि च।**
**दिवसे दिवसे मूढम्, आविशन्ति न पण्डितम्।।**

भावार्थः- मनुष्य जीवन में हर्ष और भय की सैंकड़ो व हजारों परिस्थितियां दिन प्रतिदिन आती रहती हैं और जो मूढ (अज्ञानी) व्यक्ति होते हैं वे आजीवन इन्हीं में उलझे रहते हैं परन्तु जो विद्वान और ज्ञानी व्यक्ति होते हैं, वे इन परिस्थितियों से कभी प्रभावित नहीं होते हैं।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्




## भारतीय-हज-मिशनेन सऊदी-अरबदेशे द्वौ प्रतिष्ठितौ पुरस्कारौ जितौ

भारतीय-हज-मिशनेन सऊदी-अरबदेशे आयोजिते अस्मिन् वर्षे 'खितमाहु मिस्क' समारोहे द्वौ प्रतिष्ठितौ पुरस्कारौ जितौ। एषा भारतस्य कृते एका ऐतिहासिकी उपलब्धिः अस्ति। तीर्थयात्रिणाम् उत्कृष्टसेवाः स्वीकृतुं सऊदी-हज-मन्त्रालयेन प्रतिवर्षं दीयमानः 'लब्बैतुम्' पुरस्कारः, सर्वश्रेष्ठ-हज-समन्वयन-सञ्चार-श्रेण्याः (बेस्ट कोऑर्डिनेशन एंड कम्युनिकेशन कैटेगरी) अन्तर्गतं भारतीय-हज-मिशनस्य कृते प्रदत्तः अस्ति। एषः समारोहः हज-ऋतोः औपचारिक-समापनस्य प्रतीकः अस्ति।कौंसुल जनरल फहद सूरी महोदयः, कौंसुल-हज सदफ चौधरी महोदया च समारोहे भारतस्य प्रतिनिधित्वं कृतवन्तौ। भारतीय-हज-मिशनेन एकेन वक्तव्येन उक्तं यत् एषा मान्यता हज-अभियानस्य समये सामूहिक-समर्पणं सद्भावनां (टीम स्पिरिट) च दर्शयति। मिशनः सहयोगस्य कृते अल्पसङ्ख्यक-कार्य-मन्त्रालयस्य विदेश-मन्त्रालयस्य च प्रति कृतज्ञतां प्रकटितवान्।अस्मिन् वर्षे प्रायः पञ्चसप्तत्युत्तर-एकलक्षं (१,७५,०००) भारतीयाः हज-यात्रां कृतवन्तः। भारतीय-मिशनेन सहयोगस्य कृते सऊदी-अधिकारिणाम्, स्थानीय-सेवाप्रदातॄणाम्, भागीदार-संस्थानां च अपि धन्यवादः ज्ञापितः। 'लब्बैतुम्' पुरस्कारः हज-यात्रावसरे सर्वश्रेष्ठ-सेवा-प्रदर्शनं कर्तुं देशाय प्रदीयते।



# पञ्चायतनिर्वाचनस्य अन्तिमे चरणे प्रकटितः लोकतन्त्रस्य उत्साहः, १०९ वर्षीया कुन्तीदेवी अकरोत् मतदानम्



**हिमसंस्कृतवार्ताः- बैजनाथम्।** बैजनाथ-विकासखण्डे पञ्चायतनिर्वाचनस्य तृतीयस्य अन्तिमस्य च चरणस्य मतदानकाले मतदातृषु स्वमताधिकारं प्रति अभूतपूर्वः उत्साहः दृष्टः। लोकतन्त्रस्य अस्मिन् महापर्वणि वृद्धेभ्यः आरभ्य प्रथमतया मतदानं कुर्वद्भ्यः युवपर्यन्तं सर्वे उत्साहेन सहभागितां ऊहन्तः। महालपट्ट- पञ्चायतस्य नोहरा-मतदानकेन्द्रे (पोलिंग बूथ) १०९ वर्षीया कुन्तीदेवी मतदानं कर्तुं प्राप्ता। वयसः अस्मिन् घट्टे अपि तां मतदानं प्रति सोत्साहां दृष्ट्वा परिवारजनाः तां आसन्दे (कुर्सी) उपवेश्य मतदानकेन्द्रं प्रति आनीतवन्तः, यत्र सा स्वमताधिकारस्य प्रयोगं कृतवती।एतदतिरिच्य ग्रामस्य १०१ वर्षीयः भगवानदासः, ८३ वर्षीयः भरतरामः, ८७ वर्षीया निर्मलादेवी, ८० वर्षीया दामोदरीदेवी, ८६ वर्षीया पियादेवी तथा ८३ वर्षीयः जीवनरामः अपि मतदानकेन्द्रं प्राप्य स्वप्रियाय प्रत्याशिने मतं दत्तवन्तः। एतेषां वृद्धमतदातॄणाम् उत्साहः अन्येषां मतदातॄणां कृते अपि प्रेरणास्रोतः अभवत्।अपरपक्षे, प्रथमतया मतदानं कुर्वत्सु युवसु अपि विशेषः उत्साहः दृष्टः। नोहरा-महालपट्टस्य चकितः, अंशिता, लिपाक्षी, महकः, दिशा च प्रथमवारं स्वमताधिकारस्य प्रयोगं कृतवन्तः। युनः अवदन् यत् ते इच्छन्ति यत् पञ्चायतेषु योग्याः प्रधानाः, उपप्रधानाः, पञ्चायतसदस्याः च निर्वाचिताः भवेयुः, येन ग्रामीणक्षेत्राणां समग्रः विकासः सुनिश्चितः भवेत्।मतदानकेन्द्रेषु आदिनं मतदातॄणां गमनागमनं प्रचलति स्म। वृद्धानां यूनां च सक्रियसहभागितया एतत् सिद्धम् अभवत् यत् ग्रामीणक्षेत्रेषु लोकतन्त्रं प्रति जनानां विश्वासः जागरूकता च निरन्तरं सुदृढा भवन्ती अस्ति। पञ्चायतनिर्वाचनस्य अन्तिमे चरणे दृष्टः एषः उत्साहः लोकतन्त्रस्य सुदृढतायाः सशक्तम् उदाहरणं भूत्वा सम्मुखम् आगतः।

# हिमाचलप्रदेशे ग्रीष्मकालात् परित्राणाय लक्षशः पर्यटकानाम्



## आगमनम्, पर्यटनस्थलेषु अभूतपूर्वः जनसमूहः

**हिमसंस्कृतवार्ताः- शिमला।** समतलक्षेत्रेषु प्रचलन्त्याः भीषणोष्मणः (भीषण गर्मी) निवारणाय इदानीं हिमाचलप्रदेशस्य पर्यटनस्थलेषु पर्यटकानाम् अपारः समूहः दृश्यते। सप्ताहस्य अन्ते (वीकेंड) तथा च ग्रीष्मकालीन-अवकाशकारणात् शिमला, मनाली, डलहौजी इत्यादीषु प्रमुखस्थलेषु जनानां रिकॉर्ड-संख्या दृश्यते। दिल्ली, पंजाब, हरियाणा, राजस्थान तथा उत्तरप्रदेश-सदृशेभ्यः राज्येभ्यः बहवः परिवाराः युवकाः च पर्वतान् प्रति प्रस्थितवन्तः सन्ति। मुहर्रम-पर्वणा सह सप्ताहस्य अवकाशस्य कारणात् पर्यटकानां संख्यायां महती वृद्धिः अभवत्। अस्य प्रभावः प्रदेशस्य मार्गस्थ-यातायाते स्पष्टतया दृश्यते।

## वाहनानां दीर्घतराः पङ्क्तयः-

विगतदिवसेषु लक्षशः पर्यटकानां वाहनानि प्रदेशं प्रविष्टानि। पर्यटनस्थलानां मुख्यमार्गेषु तथा च नगराणां आन्तरिकमार्गेषु वाहनानां दीर्घतराः पङ्क्तयः दृश्यन्ते। तथापि, पर्यटकानाम् एतावती वृद्धिः प्रदेशस्य पर्यटन-अर्थव्यवस्थायै महद् बलं यच्छति। पथिकनिवासः (होटल), होमस्टे, टैक्सी- चालकाः, पर्यटनव्यवसायिनः च सर्वेषां व्यवसाये महती वृद्धिः दृश्यते। कसौली, चायलसदृशे पर्यटनस्थलेषु होटलाः पूर्णतया भरिताः सन्ति तथा च अग्रिम-पञ्जीकरणं (एडवांस बुकिंग) निरन्तरं वर्धमानम् अस्ति।

## प्रदेशस्य आरक्षी-प्रशासनं सतर्कम्-

जनसमूहं यातायातस्य दबावं च दृष्ट्वा हिमाचलप्रदेशस्य आरक्षी-प्रशासनं सतर्कम् अस्ति। यातायात-प्रबन्धनार्थम् अतिरिक्त-आरक्षीबलं, 'बाइक ट्रैफिक राइडर्स', 'इंटरसेप्टर' वाहनानि नियुक्तानि सन्ति। आरक्षिणः निरन्तरं पर्यटकान् यातायात-नियमानां पालनार्थं, मार्गेषु अनधिकृत- पार्किंग परिहर्तुं तथा च अशोभनीयव्यवहारं न कर्तुं प्रार्थयन्ति, येन पर्यटन-ऋतौ व्यवस्था सुचारुरूपा भवेत्। होटल एवं रेस्टोरेंट एसोसिएशन-संघस्य अध्यक्षः गजेन्द्रसिंहठाकुरः अवदत् यत्, समतलक्षेत्रेषु भीषणोष्मणः परित्राणाय देशतः पर्यटकाः हिमाचलम् आगच्छन्ति, येन पर्यटनव्यवसाये महती गतिः आगता।

# हिमाचल-निर्वाचनम्- चतुर्णाम् नगरनिगमानां परिणामाः प्रातःकाले, जिलापरिषद्- बीडीसी- परिणामाः रात्रौ भविष्यन्ति




**हिमसंस्कृतवार्ताः- मण्डी।** हिमाचलप्रदेशस्य पञ्चायतीराज-संस्थानां, जिलापरिषदः, बीडीसी-सदस्यानां च मतगणना ३१ दिनाङ्के भविष्यति। राज्य-निर्वाचन-आयोगः अस्य सिद्धतासु संलग्नः अस्ति। जिलापरिषद- बीडीसी- सदस्यानां मतगणना सम्बद्ध- खण्डविकास- अधिकारी-कार्यालयानां परिधौ भविष्यति। जिलापरिषद-विजेतॄणाम् आधिकारिकघोषणा उपायुक्तेन, बीडीसी- विजेतॄणाम् घोषणा उपमण्डलाधिकारीभिः करिष्यते। आयोगेन मतगणना- प्रक्रियायाः शान्तिपूर्णं पारदर्शकं च सम्पादनार्थम् अधिकारिणः कर्मचारिणः च नियुक्ताः सन्ति।

## ९१ विकासखण्डेषु प्रातः ९:०० वादने मतगणना आरप्स्यते

प्रदेशस्य ९१ विकासखण्डेषु प्रातः ९ वादने मतगणना प्रारप्स्यते। जिलापरिषद-वार्डानां कृते विशेषप्रबन्धः कृतः। प्रत्येकस्मिन् वार्ड- मतगणनायै १५ तः २० पर्यन्तं सारण्यः स्थाप्यन्ते, यत्र एकस्मिन् वार्ड-गणनायै प्रायः ३५ कर्मचारिणः अधिकारिणः च नियुक्ताः भविष्यन्ति। मतसंख्याधिक्ये सारणीनां संख्या वर्धयितुं शक्यते। बीडीसी-पदानां कृते सामान्यतः त्रीणि चरणानि निर्धारिताः सन्ति, यद्यपि मतसंख्यानुसारं तत्र परिवर्तनं कर्तुं शक्यते।

**मतदान-दलानि गणना-कार्ये न नियोक्ष्यन्ते**

राज्य-निर्वाचन-आयोगेन स्पष्टं कृतं यत्, पंचायत-निर्वाचन-प्रक्रियायां ये मतदान-दलानि नियुक्तवान् आसन्, ते गणना-कार्ये न नियोक्ष्यन्ते। अस्य कृते पृथक् नवीनः स्टाफः नियुक्तः अस्ति, येन कर्मचारिणां क्लान्तिः अपाकृता स्यात् तथा च गणना-प्रक्रिया सुचारुरूपेण प्रचलति। आयोगस्य विश्वासः अस्ति यत्, पृथक्-दलानां नियुक्तेः गणनायां पारदर्शिता शीघ्रता च भविष्यति। जिलापरिषदः मतगणना रात्रौ ३ वादनपर्यन्तं प्रचलति। आगामिदिनेऽपि विजेतॄणाम् घोषणा भवितुम् अर्हति।

## नगरनिगम-परिणामाः प्रातः १०:०० वादनपर्यन्तं भविष्यन्ति

अपरतः, सोलन, मण्डी, धर्मशाला तथा पालमपुर-नगरनिगमानां परिणामान् प्रति अपि प्रशासनस्य पूर्णसिद्धता अस्ति। एतेषां निगमानां परिणामाः प्रातः १० वादनपर्यन्तं घोषितुं लक्ष्यं निर्धारितम् अस्ति। मतगणना नगरनिगम- क्षेत्रान्तर्गत- महाविद्यालयेषु अथवा विद्यालयेषु भविष्यति। जिला- निर्वाचन-अधिकारिभ्यः स्थलनिर्धारणाय निर्देशः दत्तः अस्ति। आयोगेन मतपेटिकानां सुरक्षायाः कृते दृढतमाः प्रबन्धाः कृताः सन्ति। सर्वाः मतपेटिकाः पुलिस-सुरक्षायाः मध्ये 'स्ट्रॉन्ग रूम' मध्ये रक्षिताः सन्ति।

## समयबद्ध-परिणामघोषणायाः निर्देशः

राज्य-निर्वाचन-आयोगस्य सचिवः सुरजीत राठौरः अवदत् यत्, मतगणनाप्रक्रिया निष्पक्ष-शान्तिपूर्णरूपेण समापयितुम् अस्माकं प्राथमिकता अस्ति। सर्वेषु जिलासु आवश्यकाः व्यवस्थाः पूर्णाः सन्ति, अधिकारिभ्यः च समयबद्धरूपेण परिणाम-घोषणायाः निर्देशः दत्तः अस्ति। जिलापरिषद-वार्ड- गणनायै अतिरिक्तस्टाफ अपि सज्जः भविष्यति। प्रथमं बीडीसी-सदस्यानां, तदनन्तरं जिलापरिषद-सदस्यानां च मतगणना भविष्यति।

# सञ्चारमन्त्री ज्योतिरादित्यसिन्धियामहोदयः हिन्दीपत्रकारितायाः द्विशतवर्षपूर्त्यवसरे स्मारक-डाकपत्रिकाम् (डाक-टिकट) उद्घाटितवान्

हिन्दीपत्रकारितायाः द्विशतवर्षपूर्त्युद्देश्येन, सञ्चारमन्त्री ज्योतिरादित्यसिन्धियामहोदयः अद्य नवदेहल्यां प्रथमे हिन्दीसमाचारपत्रस्य 'उदन्त मार्तण्ड' इत्यस्य सम्माने एकां स्मारक-डाकपत्रिकाम् (डाक-टिकट) प्रथमदिवसस्य आवरणं (फर्स्ट डे कवर) च विमोचितवान्। अस्मिन् अवसरे इन्दिरागान्धी-राष्ट्रिय-कलाकेन्द्रस्य अध्यक्षः रामबहादुररायमहोदयः प्रधानमन्त्रिणः नरेन्द्रमोदिनः शुभकामनासन्देशं पठितवान्। प्रधानमन्त्री स्वकीयसन्देशे उक्तवान् यत् हिन्दीपत्रकारितायाः द्विशताब्दी भारतस्य चेतनायाः, विचारस्य, जनजागरणस्य च उत्सवः अस्ति।

# हिमाचले वृष्ट्या हिमपातेन च न्यूनीभूतं तापमानम्, अष्ट-जनपदेभ्यः पीत-सतर्कता प्रसारिता



**हिमसंस्कृतवार्ताः - शिमला।** राज्यस्य उच्चशिखरेषु सद्यः संजातेन हिमपातेन तथा च पर्वतीयक्षेत्रैः सह मध्य-समतलेषु भागेषु अभूतया वृष्ट्या अधिकतमतापमाने ह्रासः (गिरावट) आगतः, येन जनाः तीक्ष्णतापात् (भीषण गर्मी) आश्रयं प्राप्वन्तः। 'नौतपा' अवधौ तप्ताः हिमाचलस्य जनाः पर्यटकाश्च अधुना शीतलमार्गस्य ऋतुं सोत्साहं परिभावयन्ति। यत्र व्यजनानि (पंखे) प्रारब्धानि आसन्, तत्रैव शिमला-नगरेण सह प्रदेशस्य अनेकेषु क्षेत्रेषु ऊर्णवस्त्राणि (गर्म वस्त्र) उष्णतायन्त्राणि (हीटर) च बहिः आगतानि। ऊना-मण्डले सर्वाधिकं २० मिलीमीटर-परिमितं वर्षणं पञ्जीकृतम्। जुब्बड़हट्टी-क्षेत्रे १०.२, सुन्दरनगरे ६.६, शिमला-नगरे ५.२, नेरी-क्षेत्रे ३, धर्मशालायां २.४, काङ्गड़ायां १.६, कुफरी-क्षेत्रे १ तथा नाहन-नगरे १.२ मिलीमीटर-परिमितं वर्षणम् अभवत्, यदा तु मनाली-क्षेत्रे विप्रुषः (बूंदाबांदी) पतिताः। राज्ये सर्वतः न्यूनं न्यूनतमतापमानं जनजातीयक्षेत्रे कुकुमसेरी-स्थाने ३.९ डिग्री सेल्सियस परिमितं पञ्जीकृतं, यदा तु अधिकतमतापमानम् ऊना-मण्डले २८.८ तथा राजधान्याः शिमलायां १७.५ डिग्री परिमितं अभिलेखितम्।

### रविवासरे अष्टसु जनपदेषु स्थास्यति 'पीतसचेतना'

ऋतुविज्ञानविभागेन रविवासरे बिलासपुर-हमीरपुर-ऊना-कुल्लू-मण्डी-शिमला-सोलन-सिरमौर इति अष्टसु जनपदेषु करकावृष्टेः (ओलावृष्टि), गर्जन-विद्युत्पातादीनां तथा च तीक्ष्णझञ्झावातस्य पीत-सतर्कता ('यैलो अलर्ट') प्रसारिता अस्ति। १ जून तः ४ जून पर्यन्तं सम्प्रति किमपि विशेषतुं सचेतना न प्रसारिता। आगामिषु ३-४ दिनेषु राज्यस्य बहुषु भागेषु न्यूनतमतापमाने २ तः ६ डिग्री सेल्सियस पर्यन्तं तथा च अधिकतमतापमाने ३ तः ६ डिग्री सेल्सियस पर्यन्तं शनैः शनैः वृद्धिः पञ्जीकरिष्यते।

अस्मिन् वर्षे सामान्यात् न्यूनवृष्टेः अनुमानम्

ऋतुविज्ञानकेन्द्र-शिमला-द्वारा वर्षे २०२६ इत्यस्य दक्षिण-पश्चिम-मानसून (जून तः सितम्बर) अवधये आगामि-जूनमासाय च दीर्घावधि-पूर्वानुमानं प्रसारितम्। ऋतुविज्ञानविभागानुसारम् अस्मिन् वारे सामान्यात् न्यूनः मानसूनः भवितुं सम्भावना वर्तते। अस्मिन् वर्षे देशव्यापी मानसूनस्य कुलवर्षा दीर्घावधि-औसतस्य (LPA) ९० प्रतिशत् भवितुम् अनुमानम् अस्ति। हिमाचले अस्मिन् वर्षे अधिकांशभागेषु मानसूनस्य वर्षा सामान्यात् न्यूना (LPA अतः ९२ प्रतिशत् न्यूना) स्थातुं सम्भावना प्रकटीकृता।

# सर्वकाराय जनता दास्यति तीक्ष्णमुत्तरम्; मिथ्याप्रतिश्रुतीनां व्यामोहे अधुना न आगमिष्यन्ति जनाः - जयरामठाकुरः



**हिमसंस्कृतवार्ताः - मंण्डी।** हिमाचलप्रदेशे पञ्चायतनिर्वाचनानां समये जनैः सर्वकारस्य विरुद्धं जनादेशः श्रावितः। एषा वार्ता विपक्षनेता जयरामठाकुरः मुराहग-क्षेत्रे उक्तवान्। जयरामठाकुरः काङ्ग्रेससर्वकारस्य उपरि तीक्ष्णं राजनैतिकप्रहारं कुर्वन् आरोपं कृतवान् यत् एतानि निर्वाचनानि गते वर्षे दिसम्बर-मासे एव भवितव्यानि आसन्, किन्तु काङ्ग्रेससर्वकारेण जानन् बुध्य च आपदः व्याजं कृत्वा एतानि षण्मासान् यावत् अग्रेसारितानि (खिसका दिया), यतो हि सर्वकारस्य आरम्भादेव लोकतान्त्रिकप्रक्रियायाः सम्मुखीभवनस्य मनसा नासीत्। अस्य विरुद्धं भारतीयजनतापक्षाय (भाजपा) उच्चन्यायालयतः (हाई कोर्ट) आरभ्य सर्वोच्चन्यायालयं (सुप्रीम कोर्ट) यावत् विधिकः सङ्घर्षः करणीयः अभवत्, अन्ते च देशस्य शीर्षन्यायालयस्य कठोरनिर्देशात् परमेव राज्यनिर्वाचनायोगेन एतेषां निर्वाचनानां प्रक्रिया प्रारब्धा।प्रदेशस्य जनता सर्वकारस्य जनविरोधिनीतीनां, मिथ्याप्रतिश्रुतीनां (झूठी गारंटियों) तथा च विकासकार्याणां रोधकतन्त्रस्य (कार्यप्रणाली) कारणात् पूर्णरूपेण उद्विग्ना (तंग) सञ्जाता अस्ति।

# सर्वकारीयसेवायां नियुक्तितः पूर्वं मादकद्रव्यपरीक्षणम् ('डोप टेस्ट') भविष्यति अनिवार्यम् - मुख्यमंत्री सुक्खुः



***हिमसंस्कृतवार्ताः - शिमला।*** मुख्यमन्त्री सुखविन्द्रसिंहसुक्खूः प्रशासनिकसचिवैः सह आयोजिते उपवेशने बजट-घोषणायाः अनुसारं चतुर्थश्रेण्याः सेवानिवृत्तानां कर्मचारिणां लम्बितायाः उपदानराशेः (ग्रेच्युटी) अवकाशनकदीकरणस्य च भुक्तिः शीघ्रं सुनिश्चितं कर्तुं निर्देशान् दत्तवान्। सः विभागाध्यक्षान् करुणामूलकाधारेण वृत्यै आवेदनं कुर्वताम् आवेदकानां पूर्णं विवरणं उपकल्पयितुं कथितवान्, येन प्रदेशसर्वकारः एतेषु प्रकरणेषु उचितं निर्णयं स्वीकर्तुं शक्नुयात्। मुख्यमन्त्री 'चिट्टा' तस्करीप्रकरणेषु संलिप्तानां शासकीयकर्मचारिणां विरुद्धं कृतायाः कार्यविधेः सूचनां प्रदातुम् आदिष्टवान्। सः अवदत् यत् प्रदेशसर्वकारेण 'चिट्टा' मादकद्रव्यस्य विरुद्धं जनान्दोलनम् आरब्धं वर्तते तथा च नशामफिया इति तन्त्रस्य विरुद्धं कठोरा कार्यविधिः क्रियते। युनः नशामार्गात् रक्षितुं सर्वकारस्य सर्वोच्चप्राथमिकतासु अन्तर्भवति।सुखविन्द्रसिंहसुक्खूः सर्वान् विभागान् न्यगादीत् यत् राजकीयसेवायां नियुक्तितः पूर्वम् अभ्यर्थिनां मादकद्रव्यपरीक्षणम् ('डोप टेस्ट') अनिवार्यं करणीयम्, अस्य कृते आवश्यकाः दिशानिर्देशाः अपि प्रसारणीयाः। मुख्यमन्त्रिणा विभिन्नेभ्यः विभागेभ्यः रिक्तानां पदानां विवरणं प्रदातुमपि आदिष्टं येन एतानि शीघ्रं पूरयितुं शक्येरन्। सः अवदत् यत् राज्यसर्वकारेण 'जूनियर ऑफिस असिस्टेंट' (कनिष्ठ कार्यालय सहायक) इत्यस्य ५०० पदानि पूरयितुं निर्णयः स्वीकृतः। मुख्यसचिवः संजयगुप्तः, अतिरिक्तमुख्यसचिवौ के.के.पन्तः ओंकारचन्दशर्मा च, प्रधानसचिवः देवेशकुमारः, मुख्यमन्त्रिणः सचिवः राकेशकंवरः, आशीषसिंहमारश्च अन्याः प्रशासनिकसचिवाः अस्मिन् उपवेशने उपस्थिताः आसन्।

### झञ्झावातेन वनभूमौ पतितानां उन्मूलितानां च वृक्षाणां सूचनां सङ्ग्रहीतुं कथितम्

मुख्यमन्त्रिणा सद्यः आगतेन झञ्झावातेन (तूफान) वनभूमौ पतितानां तथा च उन्मूलितानां (उखड़े हुए) वृक्षाणां विवरणं सङ्गहीतुम् आदिष्टम्। सः अवदत् यत् एतेषां वृक्षाणाम् अपनयनाय १ जून दिनाङ्कात् विशेषम् अभियानं प्रारप्स्यते। सः प्रतिपादितवान् यत् पतितानां वृक्षाणाम् अपनीतौ विलम्बेन राज्यस्य संसाधनानां हानिः भवति, अतः वनविभागः प्राथमिकतायाः आधारेण एतेषां शीघ्रं निष्पादनं निस्तारणं च सुनिश्चितं कुर्यात्।

# दैवाज्ञापालनार्थं भूमौ एव सज्जीकृतं मतदानकेन्द्रम्; कुल्लूजनपदे दृष्टा देवसंस्कृति- लोकतन्त्रयोः अपूर्वम् उदाहरणम्



**हिमसंस्कृतवार्ताः- कुल्लूः।** सैञ्ज-उपत्यकायाः तलाडा-पञ्चायतस्य प्रथमवार्डस्य कण्ढा-मतदानकेन्द्रं प्रति देवसंस्कृतेः लोकतन्त्रस्य च सहभागितां सुनिश्चितं कर्तुम् एका अपूर्वम् उदाहरणम् सम्मुखम् आगतम्। पञ्चायतस्य कण्ढा- ग्रामे सज्जीकृते मतदानकेन्द्रे मतदानदलं (पोलिंग पार्टी) भूमौ उपविश्य एव मतदानं कारयति स्म। मतदानदलेन प्रकोष्ठाणां कुट्टिमे (फर्श) उपविश्य मतदानं कारयितुं निर्णयः 'गर्ग ऋषिः' इति देवतायाः सम्मानाय कृतः।वास्तवतः कण्ढा-ग्रामस्य केषुचित् भागेषु देवप्रथानुसारं आसन्दे उपवेशनं तथा शय्यायां (पलंग) शयनं सर्वथा निषिद्धं वर्तते। अस्याः प्रथायाः विषयं ज्ञात्वा एव मतदानदलेन अपि देवपरम्परायाः निर्वहणस्य सङ्कल्पः कृतः, आसन्द- उत्पीठिकां (कुर्सी-टेबल) विना एव मतदानकेन्द्रं सज्जीकृतम्। ईदृशे समये मतदानदलस्य पीठासीन- अधिकारिणा (प्रिजाइडिंग ऑफिसर) मनोज महाजनेन, मतदान-अधिकारिणा मनोजशर्मणा, सोमदत्तेन, चरणजीतेन तथा च सुरक्षाकर्मचारिभ्यां भागादेई-ईश्वरदासाभ्याम् अपि देवपरम्परायाः प्राचीनमान्यतायाः च निर्वहणस्य निश्चयः कृतः, ते च कुट्टिमे उपविश्य मतदातृभ्यः मतदानप्रक्रियां सम्पादितवन्तः। अपरपक्षे, मतदानदलेन देवपरम्परायै दत्तेन महत्वेन सहैव क्षेत्रवासिनः अपि मतदानप्रक्रियायां सोत्साहं भागं गृहीतवन्तः।

# केन्द्रीयमन्त्रिभिः सह उद्योग-क्रीडामन्त्रिण्याः श्रेयसीसिंहमहाभागायाः महत्वपूर्णं मेलनम्





हिमसंस्कृतवार्ता, राघवनाथझा। बिहारसरकारस्य उद्योग-क्रीडामन्त्री सुश्री श्रेयसीसिंहमहाभागा स्वस्य नवदिल्ली-यात्राकाले विभिन्नैः केन्द्रीयमन्त्रिभिः सह शिष्टाचारभेटं कृत्वा बिहारस्य औद्योगिक-विकास, निवेशसंवर्धन, रोजगारसृजन तथा जनहितसम्बद्धविषयेषु विस्तृतरूपेण विचारविमर्शम् अकरोत्।अस्मिन् क्रमे सा केन्द्रीयसूक्ष्म-लघु-मध्यमोद्यममन्त्री श्रीजीतनराममांझीमहाभागेन सह सममिलत्। तस्मिन् अवसरे बिहारस्य औद्योगिकविकासाय गतिप्रदानम्, युवानां कृते नवीनरोजगारावसराणां सृजनम् तथा राज्यस्य समावेशीविकासार्थं केन्द्र-राज्यसरकारयोः मध्ये सुदृढसमन्वयस्य आवश्यकता इति विषये चर्चा अभवत्। केन्द्रीयमन्त्रिणा बिहारस्य औद्योगिक-विकाससम्बद्धाः बहुमूल्यसुझावाः मार्गदर्शनं च प्रदत्तम्।ततः परं सुश्री श्रेयसीसिंहमहाभागा केन्द्रीयवस्त्रमन्त्री श्रीगिरिराजसिंहमहाभागेन सह अपि सममिलत्। अस्यां भेटायां बिहारराज्ये वस्त्रोद्योगस्य विस्तारः, नवीननिवेशानाम् आकर्षणम्, स्थानीयस्तरे रोजगारसृजनम् तथा उद्योगाधारितानाम् आर्थिकक्रिया-कलापानां संवर्धनम् इत्यादिविषयेषु विशेषचर्चा अभवत्। राज्यस्य पारम्परिकहस्तशिल्प-हैण्डलूमक्षेत्रयोः राष्ट्रियस्तरे नवीनपहचानप्रदानविषयेऽपि विचारविमर्शः सम्पन्नः।सुश्री श्रेयसीसिंह-महाभागा केन्द्रीयरक्षामन्त्री श्रीराजनाथ-सिंहमहाभागेन सह अपि शिष्टाचारभेटम् अकरोत्। अस्मिन् अवसरे राष्ट्रनिर्माणम्, युवाशक्तेः सशक्तीकरणम्, औद्योगिकविकासः तथा जनहितसम्बद्ध-समसामयिकविषयाः इत्येषु सकारात्मकचर्चा अभवत्। सहैव बिहारराज्ये डिफेन्सकॉरिडोरस्य तथा DRDO-संस्थायाः स्थापनासम्भावनाविषये सार्थकविचारविमर्शः कृतः, येन राज्ये रक्षाक्षेत्राधारितोद्योगानां रोजगारावसराणां च विकासः सम्भवेत्।स्वस्य अस्मिन् नवदिल्लीयात्राकाले सुश्री श्रेयसीसिंह-महाभागया केन्द्रीयमन्त्रिणां समक्षं बिहारस्य औद्योगिक-पारम्परिकहस्त-शिल्पक्षेत्रयोः नवीनपहचाननिर्माणार्थं बहूनि महत्वपूर्णप्रस्तावानि अपि प्रस्तुतानि। तेषु राज्ये द्वयोः मेगाटेक्सटाइलपार्कयोः स्थापना, सिल्क-टूरिज्म-क्लस्टरस्य विकासः, हैण्डलूम-हैण्डीक्राफ्टक्लस्टरयोः स्थापना, राष्ट्रियहस्तशिल्पवस्त्र-इनोवेशनसंस्थानस्य स्थापना, स्पोर्टेक-एग्रोटेकक्लस्टरयोः विकासः तथा बेगूसरायक्षेत्रे इण्डस्ट्रियल-पार्कसम्बद्धविषयाः प्रमुखतया समाविष्टाः। एतदतिरिक्तं तया 'भव्य'-योजनायाः अन्तर्गतं चतुर्णां नवीनऔद्योगिकपार्काणां स्थापनायाः प्रस्तावः अपि प्रस्तुतः, येन राज्ये औद्योगिकनिवेशस्य, कौशलविकासस्य तथा व्यापकस्तरीय-रोजगारसृजनस्य संवर्धनं भविष्यति।सुश्री श्रेयसीसिंहमहाभागया उक्तं यत् बिहारस्य औद्योगिकविकासाय नवीनगतेः प्रदाने केन्द्रसरकारस्य सहयोगेन मार्गदर्शनेन च राज्ये निवेश-रोजगार-आर्थिकक्रिया-कलापानां क्षेत्रम् अधिकं विस्तृतं भविष्यति। तया अपि उक्तं यत् माननीयमुख्यमन्त्री श्रीसम्राटचौधरी-महाभागस्य नेतृत्वे बिहारसरकारः उद्योगविकासाय, युवभ्यः रोजगारप्रदानाय तथा बिहारराज्यस्य औद्योगिकदृष्ट्या सशक्तीकरणाय निरन्तरं कार्यं करोति।

# मठ-मन्दिर-देवालयभूमिसंरक्षणं राज्यसरकारस्य सर्वोच्चप्राथमिकता




**अतिक्रमणनिवारणार्थं विशेषप्रकोष्ठस्य गठनं भविष्यति – डॉ० दिलीपकुमारजायसवालः**

हिमसंस्कृतवार्ता, राघवनाथझा। पाटलिपुत्रे माननीयस्य राजस्व-भूमिसुधारमन्त्रिणः डॉ० दिलीपकुमारजायसवालमहाभागस्य अध्यक्षतायां राज्यव्यापिनां बिहारराज्यधार्मिकन्यासपरिषदोऽधीनभूमीनाम् अतिक्रमणनिवारणसम्बद्धा महत्वपूर्णा संगोष्ठी आयोजिता। अस्यां संगोष्ठ्यां धार्मिकन्यासानां, मठानां, मन्दिराणां, देवालयानां च भूमिसंरक्षणम्, अतिक्रमणनिवारणप्रक्रियायाः तीव्रीकरणम् तथा समन्विततन्त्रविकासः इत्यादिविषयेषु विस्तृतरूपेण विचारविमर्शः अभवत्।संगोष्ठ्यां माननीयविधिमन्त्री श्रीसंजयसिंहटाइगरमहाभागः, बिहारराज्यधार्मिकन्यासपरिषदः अध्यक्षः श्रीरणवीरनन्दनमहाभागः, विधिविभागस्य विशेषसचिवः श्रीवैष्णवशङ्करमल्होत्रामहाभागः, राजस्व-भूमिसुधारविभागस्य सचिवः श्रीजयसिंहमहाभागः, श्रीमती सीमात्रिपाठीमहाभागा तथा राजस्वविभागस्य अन्ये वरिष्ठाधिकारिणः उपस्थिताः आसन्। संगोष्ठीसमये माननीयमन्त्रिणा डॉ० दिलीपकुमारजायसवालमहाभागेन उक्तं यत् राज्यव्यापिनां धार्मिकन्यासानां मठमन्दिरदेवालयानां च लक्षाधिकविस्तृतभूमीनां संरक्षणं राज्यसरकारस्य सर्वोच्चप्राथमिकता वर्तते। तेन उक्तं यत् दीर्घकालात् अनेकासां धार्मिकन्यासभूमीनाम् उपरि अवैधाधिपत्यसम्बद्धाः शिकायतयः प्राप्ताः सन्ति। तासां गम्भीरतया परीक्षणं कृत्वा राज्यसरकारेण अधुना व्यापकस्तरे अतिक्रमणनिवारणकार्यवाही आरभ्यते।माननीयमन्त्रिणा उक्तं यत् प्रभाविकार्यवाह्याः सुनिश्चित्यर्थं राजस्व-भूमिसुधारविभागस्य, विधिविभागस्य तथा बिहारराज्यधार्मिकन्यासपरिषदः संयुक्तसमन्वयेन विशेषप्रकोष्ठस्य गठनं भविष्यति। अयं विशेषप्रकोष्ठः धार्मिकन्यासपरिषदः भूमिसम्बद्धप्रकरणानाम् निरीक्षणं, वैधानिककार्यवाहीं तथा अतिक्रमणनिवारणप्रक्रियाम् समन्वितरूपेण अग्रे नयिष्यति। एतदर्थं विस्तृता मानककार्यप्रणाली अपि निर्मास्यते, येन कार्यवाही पारदर्शितया समयबद्धतया च सम्पन्ना भविष्यति।मन्त्री डॉ० जायसवालमहाभागेन अधिकारिणः निर्देशिताः यत् बिहारराज्यधार्मिकन्यासपरिषदः न्यायाधिकरणेन येषु प्रकरणेषु अतिक्रमणनिवारणसम्बद्धाः आदेशाः पूर्वमेव पारिताः सन्ति, तेषु प्रकरणेषु विशेषाभियानं सञ्चालयित्वा भूमयः अतिक्रमणमुक्ताः क्रियन्ताम्। तेन स्पष्टतया उक्तं यत् सम्बन्धितक्षेत्राणाम् अञ्चलाधिकारिभ्यः एषा जिम्मेदारी प्रदास्यते तथा कार्यवाह्याः नियमितनिरीक्षणम् अपि क्रियिष्यते।संगोष्ठ्याम् एतदपि चर्चितं यत् धार्मिकसंस्थानानां सम्पत्तीनाम् अद्यतनाभिलेखीकरणम्, सङ्गणकीकृताभिलेखनिर्माणम् तथा विवादितभूमीनाम् अभिज्ञानं कृत्वा प्राथमिकतायाः आधारेण कार्यवाही प्रवर्तिष्यते। राज्यसरकारस्य उद्देश्यं धार्मिकन्यासपरिषदः सम्पत्तीनां संरक्षणं सुनिश्चित्य ताः जनहिताय धार्मिककार्यसञ्चालनाय च सुरक्षितरूपेण संरक्षितुं वर्तते।माननीयमन्त्रिणा पुनरपि उक्तं यत् राज्यसरकारः धार्मिकसंस्थानानां परिसम्पत्तीनां संरक्षणार्थं पूर्णतया प्रतिबद्धा अस्ति तथा अस्मिन् विषये कापि लापरवाही कदापि न सहिष्यते।

# कृषिमन्त्रिणा विजयकुमारसिन्हमहाभागेन केन्द्रीयकृषिमन्त्रिणे विभिन्नराज्यानां कृषिमन्त्रिभ्यश्च शाहीलीचिफलानि समर्पितानि

हिमसंस्कृतवार्ता,राघवनाथझा। राष्ट्रीयकृषिसम्मेलने बिहारराज्यस्य विश्वप्रसिद्धा "शाहीलीची" विशेषाकर्षणस्य केन्द्रमभवत्। बिहारसरकारस्य माननीयेन कृषिमन्त्रिणा श्रीविजयकुमार सिन्हमहाभागेन माननीयाय केन्द्रीयकृषि-किसानकल्याणमन्त्रिणे श्रीशिवराजसिंहचौहान महाभागाय, गुजरातराज्यस्य माननीयाय राज्यपालाय श्रीदेवव्रताचार्यमहाभागाय तथा विभिन्नराज्येभ्यः समागतेभ्यः माननीयकृषिमन्त्रिभ्यः बिहारस्य गौरवप्रतीकभूतानि शाहीलीचिफलानि समर्प्य राज्यस्य समृद्धकृषिपरम्परायाः कृषकाणां च अथकपरिश्रमस्य परिचयः प्रदर्शितः।अस्मिन् अवसरे बिहारस्य शाहीलीच्याः विशिष्टगुणवत्ता, स्वाभाविकमाधुर्यम्, अद्वितीयसौरभम् तथा देशविदेशेषु वर्धमाना ख्यातिः इत्यादिविषयेषु विस्तृतरूपेण विचारविमर्शः अभवत्। माननीयेन कृषिमन्त्रिणा श्रीविजयकुमारसिन्ह-महाभागेन उक्तं यत् बिहारस्य शाहीलीची केवलं फलविशेषः नास्ति, अपितु राज्यस्य कृषिसमृद्धेः, कृषकाणाम् अनवरतपरिश्रमस्य तथा बिहारस्य गौरवपूर्णपरिचयस्य सजीवप्रतीकमस्ति।तेन उक्तं यत् राज्यसरकारः कृषकाणाम् आयवृद्ध्ये, कृष्युत्पादानां राष्ट्रिय-अन्तरराष्ट्रीयस्तरे व्यापकविपणनव्यवस्थायै तथा बिहारस्य विशिष्टकृष्युत्पादानां वैश्विकपरिचयविस्ताराय निरन्तरं प्रयत्नशीलः अस्ति।राष्ट्रीयकृषिसम्मेलने बिहारस्य शाहीलीच्याः आकर्षकप्रस्तुतीकरणेन उपस्थितानाम् अतिथीनां विशेषध्यानम् आकृष्टम् तथा बिहारस्य कृषिक्षमतायाः राष्ट्रियस्तरे नूतना प्रतिष्ठा प्रदत्ता।








हिमसंस्कृतवार्ता

असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा - ४४

आचारः प्रथमो धर्मः इति सूक्तिः । जगति केनचन प्रवर्तनीयं चेत् तत्कृते प्रथमतः स्वाचरणस्य, सुव्यवहारस्य वा अत्यन्तम् आवश्यकता । सदाचारकारणतः मनुष्यस्य इहलोके परलोके च सुखमयं सार्थकोपेतं च जीवनं भोक्तुमर्हति । अतः जीवने सफलतां प्राप्तुञ्चेत् स्वकीयं सदाचरणं सम्यक्तया रक्षणीयम् । विषयेऽस्मिन् किञ्चिद्विवरणमत्र प्रस्तूयते ।


सामान्यतः मनुष्यस्य विविधैः क्रियाकलापैः समन्वितः, दैनन्दिकः यः व्यवहारः, सः आचारः कथ्यते । यः सात्त्विकः, पवित्रः च आचारः स्यात्, सः सदाचारः आख्यायते । कर्म द्विविधम् - वेदविहितं, वेदनिषिद्धं चेति । वेदप्रतिपादितं कर्म हि धर्मः नाम । आचारः हि व्यक्तिः, समाजः, संस्कृतिः, सभ्यता इत्यादिभ्यः सम्मानं प्रददाति । 'आचारः परमो धर्मः' इति वशिष्ठादिमुनीनां मतम् । आचारहीनानां मनुष्याणां कृते इहलोकः, परलोकः च न क्वापि सुखकरः । तेषाम् असिद्धं जीवनं सर्वत्र । आचारहीनेषु व्यक्तिषु यज्ञः, यागः, वेदः, धर्मः इत्यादयः प्रतिष्ठिताः भवितुं नार्हेयुः कदाचिदपि । तस्मात् मनुष्येण सदाचारव्रतं व्यावहारिकरूपेण, आनुष्ठानिकरूपेण च विधातुम् अत्यन्तम् आवश्यकम् । केवलेन बहिर्ज्ञानेन न कश्चन लाभः, तदर्थं तु आचरणस्य हि प्रधानता भवति जीवने । आचरणस्य प्रभावः महान्, प्रभावोत्पादकः च भवति । आचरणव्रतस्य स्वल्पमपि पालनं, पर्वतवत् महद्व्याख्यानतः अपि गुरुतरं मन्यते । गोस्वामितुलसीदासस्य वचनम् -

**पर उपदेस कुसल बहुतेरे । जे आचरहिं ते नर न घनेरे ।। इति ।**

"स्वधर्मे निधनं श्रेयः परधर्मो भयावहः" - गीता । अर्थात् गुणरहितः अपि स्वधर्मः हि कल्याणकरः भवति । अतः सदाचारार्थम् - स्वधर्मस्य पालनं मनुष्यस्य मुख्यं कर्तव्यम् । प्रातःजागरणं ब्रह्ममुहूर्ते प्रशस्यते । 'ब्राह्मे मुहूर्ते बुद्ध्येत धर्मार्थावनुचिन्तयेत्' इति । 'हरिं चिन्तयेत् नित्यम्' इति विशुद्धभावेन सततं भगवत्स्मरणं कर्तव्यम् । शास्त्रोद्घोषणं यत् - 'नारायणाख्यं पीयूषं पिब जिह्वे निरन्तरम्' इति ।

**जिन्ह कर नामु लेत जग माहीं । सकल अमंगल मूल नसाहीं ।।**

नामसंकीर्तनेन जगतः समस्तम् अमङ्गलं दूरीभवति । मनुष्यः जगति सदुपयोगी भवेत् - 'कुर्वन्नेवेह कर्माणि' इति । निषिद्ध-कर्माणि त्यजेत् । इत्येवं प्रकारेण मनुष्यः शुद्धः अन्तःकरणयुक्तः सन् सत्कर्मणां सम्पादनम्, अनुष्ठानादिकं कुर्वन् जीवेत् । सदाचरणं नाम इदमेव, येन मनुष्यः दुर्लभं जीवनमिदं प्राप्य स्वस्य, परिवारस्य, समाजस्य, राष्ट्रस्य उद्धारकः भवितुमर्हेत् इति



श्रीसिन्धियामहोदयः अस्मिन् प्रसङ्गे अवदत् यत् पत्रकारितायाः इतिहासः भारतस्य इतिहासः अपि अस्ति। सः कथितवान् यत् पत्रकारिता (पेशा) नास्ति, अपितु एषः राष्ट्रियजागरणस्य आन्दोलनम् अस्ति। सः एतस्यापि उपरि बलं दत्तवान् यत् समयः परिवर्तयितुं शक्नोति, तन्त्रज्ञानं (तकनीक) परिवर्तयितुं शक्नोति, मञ्चाः च परिवर्तयितुं शक्नुवन्ति, परन्तु पत्रकारितायाः मूलकर्तव्यं कदापि परिवर्तनीयं न भवेत्।




# "वाङ्मनसयोःसंवाद" {६९}

वाङ्मनस् विषयकम् आख्यानं शतपथब्राह्मणे सम्वादरूपेण निरूपितमस्ति। एकदा वाङ्मनसोर्मध्ये विवादः सञ्जातः। तदा मन उवाच- अहमेव त्वच्छ्रेयोऽस्मि, यतः यदहं जानामि, तदेव भणसि। यदहं न जानामि तद्विषयं त्वं वक्तुं न शक्नोसि। एवं मेऽनुकरणशीला त्वम् मत्तः श्रेयः कथं भविष्यसि? एतच्छ्रुत्वा वागुवाच, अहमेव त्वच्छ्रेयोऽस्मिति यतः यद्वै त्वं वेत्थ तदहमेव विज्ञापयामि संज्ञापयामि च। वयं प्रजापति प्रति प्रश्नमेयतुः। स प्रजापतिः मनस एव श्रेष्ठ इति निर्णीतवान्। मनसः अनुवर्त्मा त्वमेवासि। अनुगमनकर्ता तु लघुः पापीयान् एव भवति। एवं प्रजापतेर्मुखात् प्रतिकूलं निर्णयं श्रुत्वा सा उद्विग्ना वाणी गर्भं त्यक्तवती प्रजापतिमुवाच अहं तुभ्यं हविर्द्रव्यनेत्री न भविष्यामि। तस्मात् यत्किञ्च प्राजापत्यं यज्ञे क्रियते तद् उपांशु एव क्रियते। भगवत्या वाग्देव्याः स एव गलितः पतितः गर्भः अत्रि अभूत्।अत एव तस्माद् कालाद् आरभ्य अद्यावधि पर्यन्त गलितगर्भा रजस्वला स्त्री आत्रेयी इति उच्यते।

डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। अद्य प्रथमा वार्ता वर्तते - बेङ्गलूरु-नगरस्य इन्दिरानगरे केवलं दशनिमेषवृष्ट्या मार्गः जलमग्नः कृतः, येन एकेन क्रुद्धेन निवासिना स्वस्य आक्रोशः प्रकटितः।

**काव्या-** नमस्ते नन्दिनि। सत्यम्, नगरस्य दुर्बल-व्यवस्थायाः कारणात् जनाः अतीव क्लिश्यन्ति। वर्षाकालस्य सौन्दर्यं नष्टं जातम् इति तेन चिन्ता प्रकटिता। इतः परं द्वितीया वार्ता अस्ति– पुण्यपत्तने एकादशवर्षीयेन बालकेन श्रीरङ्गेन स्वकीया नूतना अन्तर्जाल-पाकशाला आरब्धा, पाकविद्यायां च महती उन्नतिः साधिता।

**नन्दिनी-** शोभनम्! बालस्य अयं प्रयासः अतीव प्रशंसनीयः अस्ति। सः लघुवयसि एव स्वावलम्बी जातः। अथ तृतीया वार्ता– मङ्गलूरु-नगरस्य षष्टिवर्षीयेन उद्यमिना अष्टत्रिंशत्-देशेषु एकाकिना द्विचक्रिकया प्रवासं कर्तुं सज्जता कृता अस्ति। सः स्वकीयां यात्राम् अचिरेण आरभते।

**काव्या-** अहो! षष्टितमे वर्षे अपि तस्य उत्साहः अतीव विस्मयजनकः वर्तते। सः तु वार्धक्यं केवलं मनसः अवस्था अस्ति इति दर्शितवान् अस्ति।
अथ चतुर्थी वार्ता– केनचित् सामाजिक- जालपुट-प्रयोक्त्रा भार-वाहन-उत्थापक-चालकस्य कार्यं 'संसारस्य मूर्खतमं कार्यम्' इति कथितम्। ततः परं तस्य भर्त्सनं सामाजिक-माध्यमे अन्यैः सदस्यैः कृतम्।

**नन्दिनी-** एतत् अतीव अनुचितम्। सर्वे श्रमाः आदरणीयाः भवन्ति, कस्याश्चित् जीविकायाः उपहासः न करणीयः। अद्यतनः कार्यक्रमः अत्रैव समाप्तः भवति। धन्यवादः!






# वोट तिसजो पाओ सैजे लाके रा विकास करवाओ

**आई गए इलेक्शन चला मेरी पहणा कने भाई
वोट असां अपणियाँ मर्जिया रा देणा अज पाई
चोर उच्चका फ्रॉडी दारुमास्टर कने शराबी कबाबी
हुणके इलेकशना च करनी असां बी जबाबी कार्रवाई**

एहडें उम्मीदवारा जो वोट पाणा
सैजे सुखा दुखा च कम्म आओ
तिसगे जे टैम कने सेवा भाबना हो
सैजे म्हारे लाके रा विकास करवाओ

**सैजे न किसी जो रिश्वत खाणे देयो न खुद खाओ
भ्रष्टाचार मटाणे जो सैजे हमेशा अगे आओ
नशा न खुद करे न होरी जो करवाओ
चिट्टे रे चटेड़ियाँ जो जेला री हवा लवाओ**

सफेद कपड़े पहनी कने कम्म करे काऴे
एहड़े आदमिये री पहले ई करो पच्छयान
साफ सुथरे मेहनती ईमानदार आदमिये जो
वोट पाणा, ईसा गला रा रखणा तुहां ज़्यादा ध्यान

**राजनीतिया जो सारे नेता दसदे समाज सेवा
इलेक्शन जीतणे ते बाद लुटदे दुईं हत्थें मेवा
अज्जकल सारे ई बणना चाहन्दे प्रधान
बिरले ई अये सैजे सही मायने च करे सेवा**

हुई सके तां सब लोक मिली बैठी कने
अपणेयां गिले शिकवेयाँ जो भुलाओ
**अपणी पंचायती रा निर्विरोध चुनाव करवाओ**
कने सरकरा ते पच्ची लख बी पाओ

पार्टियां ते कुछ नी मिलणा
ईमानदार आदमिये जो अग्गे ल्यावो
पार्टियां बहुत करी चुकी राजनीति
हुण अपणे भाईचारे जो अग्गे बढ़ाओ

रवींद्र कुमार शर्मा, घुमारवीं
जिला बिलासपुर हि प्र